Degree notes दूतवाक्यम्

1. काव्येषु रम्यं किम् ?

स. काव्येषु रम्यं नाटकम् ।

2. सरस्वत्याः दरहासः कः ?

स. सरस्वत्याः दरहासः भासः ।

3. दूतवाक्यकथा कस्मात् इतिहासात् स्वीकृता ?

स. दूतवाक्यकथा महाभारतात् इतिहासात् स्वीकृता ।

4. राज्यं नाम किम् ?

स. राज्यं नाम रिपून् जित्वा भुज्यते । तत् लोके न याच्यते, न वा दीनायदीयते ।

5. पाण्डवदूतत्वेन कुरुसभां कः आगतः ?

स. पाण्डवदूतत्वेन कुरुसभां वासुदेवः (श्रीकृष्णः) आगतः।

6. श्रीकृष्णस्य चक्रायुधस्य नाम किम् ?

स. श्रीकृष्णस्य चक्रायुधस्य नाम सुदर्शनः ।

अशान्ति विरामम्

7. श्रीमद्रामायणकल्पवृक्षरचनायै श्रीमता विश्वनाथसत्यनारायणमहाशयेन सम्प्राप्तः पुरस्कार विशेषः कः ?

स. श्रीमद्रामायणकल्पवृक्षरचनायै श्रीमता विश्वनाथसत्यनारायणमहाशयेन सम्प्राप्तः पुरस्कार विशेषः ज्ञानपीठ पुरस्कारः ।

Scanned with OKEN Scanner

8. वेयिपडगलु नामकः महागद्यप्रबन्धः महाकविना श्रीमता विश्वनाथसत्यनारायणवर्येण कतिदिवसेषु विरचितः?

स. "वेयिपडगलु" नामकः महागद्यप्रबन्धः महाकविना श्रीमता विश्वनाथसत्यनारायणवर्येण अष्टाविंशति (28) दिवसेषु विरचितः ।

9. अर्जुनस्य दशविधनामानि निर्दिशत ?

स. अर्जुनस्य दशविधनामानि -

अर्जुनः फल्गुणः पार्थः किरीटी श्वेतवाहनः ।

बीभत्सो विजयः कृष्णः सव्यसाची धनञ्जयः ॥

10. अमरभारत्यां श्रीमता सत्यनारायणमहाभागेन विरचितं रूपकत्रयं किम् ?

स. अमरभारत्यां श्रीमता सत्यनारायणमहाभागेन विरचितं रूपकत्रयम् -

1) गुप्तपाशुपतम् 2) अमृतशर्मिष्ठम् 3) अशनिनिरासम् ।

11. कं वैदिकसाहित्यभागमाधारीकृत्य श्रीमता सत्यनारायणमहोदयेन अशनिनिरासम् इति रूपकं विनिर्मितम् ।

स. कृष्णयजुर्वेदीय-तैत्तरीयारण्यकम् आधारीकृत्य श्रीमता सत्यनारायण महोदयेन अशनिनिरासम् इति रूपकं विनिर्मितम् ।

उपनिषद्वादेश०

12. धर्ममूलं किम् ?

स. अखिलः वेदः एव धर्ममूलम् । स्मृतयः, साधूनाम् आचारः, आत्मनः तुष्टिरपि धर्मः एव भवन्ति ।



Scanned with OKEN Scanner

13. उपनिषद् इति शब्दस्य अर्थः क ?

स. उपनिषद् इति शब्दस्य बहवः अर्थः शान्ति । रहस्यम्, तत्त्वम्, सारः, तात्पर्यम् इति । अज्ञानविनाशिनी, ब्रह्मतत्त्वबोधिनी विद्या उपनिषद् भवति । वेदान्तः इत्यपि उच्यते ।

14. प्रधानाः उपनिषदः कति सन्ति ?

स . उपनिषद अनेकाः सन्ति । तथापि प्रधानाः उपनिषदः दश सन्ति ।

ताश्च –

ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः ।

ऐतरेयं च छान्दोग्यं बृहदारण्यमेवच ॥

15. शिस्यानुशासनम् कस्याम् उपनिषदि प्रोक्तम् ?

स. कृष्णयजुर्वेदस्य तैत्तिरीयारण्यके तैत्तिरीयोपनिषदि शिष्यानुशासनं प्रोक्तम् । तत्र शिक्षावल्यां एकादशानुवाकः अयं पाठ्यांशः ।

16. काभ्यां न प्रमदितव्यम् ?

स. स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् एवमेव सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् भूत्यै न प्रमदितव्यम् ।



Scanned with OKEN Scanner